**International Journal of Multidisciplinary Research and Development**
**Online ISSN: 2349-4182, Print ISSN: 2349-5979, Impact Factor: RJIF 5.72**
**www.allsubjectjournal.com**
**Volume 4; Issue 4; April 2017; Page No. 298-300**

# कविरहस्ये क्रियापदप्रयोगवैशिष्ट्यम्

**Pragya**
Research Student, Department of Sahitya, Rastriya Sanskrit Sansthan, Ved Vyas Campus, Balahar, Kangra, H.P., India

## प्रस्तावना

महाकविहलायुधप्रणीतं विशिष्टधातुप्रयोगप्रधानं कविरहस्यं नाम काव्यम् अति प्रसिद्धमस्ति। इयं प्रयोगपरम्परा प्राचीनास्ति। यथा महाभाष्ये पद्यं दृश्यते-

स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च।
नेतारावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च।।[१]

अत्र हि "अचः परस्मिन् पूर्वविधौ"[२]इति सूत्रस्य प्रयोजन-निदर्शकानि पादिक-औदवाहि-शतानि-पातनी-धारणि-रावणीति नामानि दर्शितानि। स्रंस्यते ध्वंस्यते इति क्रियाद्वयं च दर्शितम्। कानि पुनरस्य योगस्य प्रयोजनानीति पर्यनुयोगे महाभाष्यकारः पद्यमेतदुद्धतवान्।

अन्यत्रापि महाभाष्ये[३] इत्यत्र "उपाद्देवपूजासङ्गतिकरणयोः" इति वार्तिकस्य व्याख्यायां पद्यद्वयमिदं कुतोऽपि प्राचीनकाव्यादुद्ध्रियते-

बहूनामप्यचित्तानामेको भवति चित्तवान्।
पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते।
मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम्।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति।।[४]

अत्र प्रथमे पद्ये देवपूजायाम् "उपतिष्ठते" इत्यात्मनेपदोदाहरणं प्रयुक्तम्। द्वितीये च देवपूजाया अभावे "उपतिष्ठति" इति परस्मैपदमेव प्रत्युदाहरणत्वेन प्रयुक्तम्। इहैव द्वितीये पद्ये "कापेयम्" इति "कपिज्ञात्योर्ढक्"[५]इत्यस्योदाहरणमस्ति। पद्ययुगलमिदं कस्माच्चित् प्राचीनाद् व्याकरणोदाहरण-काव्यादेव भगवत्पतञ्जलिना समुद्धतमिति विद्वांसः सम्भावयन्ति।

"अक्षशलाकासंख्याः परिणा"[६] अस्य सूत्रस्योदाहरणानि भोजदेवस्य शृङ्गारप्रकाशे समुद्धते निम्नश्लोके मनोहारितया प्रयुक्तानि-

श्लाकापर्यभिद्यूतं चतुष्पर्यक्षपर्यपि।
विपर्यस्ते विधौ पश्य नलादेरपि जायते।।[७]

तथा च-
दण्डादण्डि न कुर्वन्ति न कचाकचि कोकिलाः।
तथापि जितमेवैभिर्वाग्भिरेव जगत्रयम्।।[८]

अत्र "तत्र तेनेदमिति सरूपे" [९]इत्यस्य द्वे उदाहरणे सुतरां हृदयग्राहितया प्रयुक्ते।
अन्यच्च-
प्रसादीयति यः कुट्यां पर्यङ्कीयति मञ्चके।
तस्य सन्तोषशीलस्य कुब्जिकाप्यप्सरायते।। इति।

अस्य पद्यस्य पूर्वार्धो भाषावृत्तौ "उपमानादाचारे"[१०]इत्यत्र "अधिकरणाच्च" इति वार्तिकस्योदाहरणत्वेन उद्धृतः, उत्तरार्धश्च "कर्तुः क्यङ् सलोपश्च" [११]इत्यत्र "ओजोऽप्सरसोर्नित्यं पयसस्तु विभाषया" इति अप्सरसः सलोपप्रसङ्गे कुतोऽपि प्राचीनकाव्यादुद्धृतः।

एतैरुद्धरणैः प्राचीनानां लुप्तानाम् उदाहरणकाव्यानामकृत्रिमस्वादुपदा रचना रमणीयतायाः परां कोटिमाटीकमानानुभूयते। व्याकरणोदाहरणकाव्यानाम् इयं परम्परा अद्यापि प्रवर्तमाना दृश्यते- एतादृशानि काव्यानि "काव्यशास्त्रम्" इति सञ्ज्ञाविशेषेणाभिधीयन्ते। यथाह भोजदेवः:-

यत्रार्थः शास्त्राणां काव्ये निवेद्यते महाकविभिः।
तद् भट्टिकाव्यमुद्राराक्षसवत् काव्यशास्त्रं स्यात्।।[१२]

क्षेमेन्द्रोऽप्याह-
भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते।[१३]

संस्कृतवाङ्मये अर्वाचीनकालेऽपीयम् उदाहरणकाव्यानां परम्परा श्रीरामवर्मचरित्र-सुरूपराघव-पाणिनीयसूत्रोदाहरण-सुगलार्थमाला-सज्जनेन्द्रप्रयोगकल्पद्रुम-कौमुदीकथाकल्लोलिनी व्याकृतिवत्सराजादिरूपेण अनवरतं प्रवृत्ताभूत्। इह कविरहस्यगतक्रियाप्रयोगवैशिष्ट्यं निरूप्यते।

## कविरहस्यस्य रचयिता हलायुधः

दशमे ख्रिष्टशतके गौडदेशवासी कविवरो हलायुधो विशिष्टधातु- प्रयोगप्रदर्शनपरं कविरहस्यं नाम लघु काव्यं प्रणिनाय। अस्मिन् २९८ श्लोकसंख्योपेते काव्ये वैयाकरणः कविर्हलायुधो राष्ट्रकूटवंशोद्भवस्य तृतीयस्य कृष्णराजस्य गुणवर्णनप्रसङ्गेन धातूनां विशिष्टप्रयोगान् दर्शितवान्। तथा चाह ग्रन्थकारः:-

अस्त्यगस्त्यमुनिज्योत्स्नापवित्रे दक्षिणापथे।
कृष्णराज इति ख्यातो राजा साम्राज्यदीक्षितः।।[१४]

प्रयोगप्रदर्शनशैली च कविना स्वयमित्थं प्रकटीकृता-
एकार्था एकशब्दाश्च भिन्नार्था एकवाचकाः।
तुल्यार्थास्तुल्यशब्दाश्च नानार्थाः सदृशाक्षराः।।
एकार्थाः समशब्दाश्च निबध्यन्तेऽत्र धातवः।
धातुपारायणाम्भोधिपारोत्तीर्णधिया मया।।[१५]

एकार्था एकशब्दाश्च धुनोति-धुनातीत्यादयः। तुल्यार्थास्तुल्यशब्दाश्च पुष्णाति पुष्यतीत्यादयः। अथानयोर्वाक्ययोः कोऽर्थभेद इति चेदुच्यते- धूञोऽर्थः कम्पनम्, तदपरेण धातुना कपि चलनेऽनेन कथ्यते। पुषोऽर्थः पुष्टिलक्षणोऽनेनैव पुषिधातुनेत्यनयोः प्रथमतृतीययोर्वाक्ययोर्महान् भेदोऽस्ति। भिन्नार्था एकवाचका

एकशब्दा इत्यर्थः। स्वरव्यञ्जनसमुदायो हि शब्द उच्यते। यथा- क्षि क्षये, क्षि निवासगत्योः। विद ज्ञाने, विद विचारणे, विद सत्तायाम् इत्यादयः। नानार्थाः सदृशाक्षराः। अक्षरं व्यञ्जनमात्रमेव न स्वरचिन्ता करणीया। स्वरस्य गुणवृद्ध्यादिकार्येणानित्यत्वात्। यथा- मेङ् प्रणिदाने, मीङ् हिंसायाम्, डुमिञ् प्रक्षेपणे, चुल्ल भावकरणे, चिल्ल शैथिल्ये इत्यादयः।
एकार्थाः समशब्दाश्च एकार्थाश्च समशब्दाश्च। एकर्थाः समशब्दाः यथा- क्नूञ् शब्दे, क्नूयी शब्दे। गजति गर्जतीत्यादयः। गर्ज मार्ज शब्दार्थाः। कविरहस्यस्य वैशिष्ट्यात् विद्वत्समाजे महती ख्यातिरस्ति। अत्रैतत्काव्यगता विशिष्टाः क्रियाप्रयोगाः निदर्शनतया प्रस्तूयन्ते-

यः शोभते सदसि शक्र इवोज्ज्वलश्रीः,
स्त्रीणां पुरः शुभति काम इवाभिरामः।
यः शुम्भति त्रिपुरशत्रुरिवात्तधन्वा।
शक्रं निशुम्भति कृतान्त इवाहवस्थः[१६]।।

अत्र शुभ-शुम्भ-क्रियारूपप्रयोगेण सह उपमालंकारोऽपि रमणीयतया निबद्धः।

गजति गजसमूहस्तस्य वेलावनान्ते,
सरुष इव समुद्राः प्रेक्ष्य तं गाजयन्ति।
तदुभयमनुकर्त्तुं गर्जतीवाम्बुवाहः,
प्रतिरवपरिपूर्णा गर्जयन्त्यद्रयोऽपि[१७]।।

अत्र गज-गर्ज-क्रियारूपप्रयोगेण सह व्यतिरेकालंकारोऽपि रमणीयतया निबद्धः।

तापयत्यशिशिरद्युतिर्दिवा पावकस्तपति वासरक्षये।
यः सदा वितपते निजौजसा तप्यते च मुनिवत् परन्तपः[१७]।।

अत्र तप-क्रियारूपप्रयोगेण सह व्यतिरेकालंकारोऽपि शोभनतया निबद्धः।

अतिरेचयति श्रिया सुरेन्द्रादतिरिंक्ते च स तेजसा खरांशोः।
व्यतिरेचति नात्मबन्धुवर्गाद् ददतोऽप्यस्य रिणक्ति नार्थसम्पत्[१८]।।

अत्रापि रिचिर्-धातुप्रयोगेण सह व्यतिरेकालंकारोऽपि नितरां सुन्दरतया निबद्धः।

रात्रावुदयते चन्द्रो दिवोदयति भास्करः।
उदेति यः सदैवोर्व्यां नोदीयन्ते च विद्विषः[१९]।।

अत्र हि नृपस्योदयः चन्द्रसूर्ययोः उदयादतिरिच्यते। अहर्निशं विद्यमानत्वात्।

दात्यूहः कणति क्वणत्यविरतं श्वेतच्छदानां गणः,
तीरोपान्ततरुस्थिता च कुररश्रेणी कुणत्युत्सुका।
यस्यान्तःपुरदीर्घिकासु हृदयं यूनां समुत्कण्ठयत्,
कर्णाटीसुरतस्वरानुकरणैः कोयष्टिकः कूजति[२०]।।

अत्र कण-क्वण-कुण-क्रियारूपप्रयोगः शोभनतया निबद्धः।

गोपायति क्षितिमिमां चतुरब्धिसीमां
धीमानधर्मवचनाच्च जुगुप्सते यः।
वित्तं न गोपयति यस्तु वनीयकेभ्यो
धीरो न गुप्यति महत्यपि कार्यजाते[२१]।।

अत्र गुपक्रियारूपप्रयोगाः शोभनतया निबद्धाः।

धूनोति चम्पकवनानि धुनोत्यशोकं,
चूतं धुनाति धुवति स्फटिताविमुक्तम्।
वायुर्विधूनयति केशरपुष्परेणून्,
यत्कानने धवति चन्दनमञ्जरींश्च[२२]।।

अत्र धूञ् धातुर्नानाविकरणः प्रयुक्तः।

व्यायामशीलः पुरुषो न मेदते प्रायेण मेदत्यकृतश्रमो जनः।
एवं विदित्वा युधि वाजिवारणैः व्यायच्छते यश्च न मेदयत्यतः[२३]।।

अत्र मिदधातो प्रयोगो दृश्यते। अत्र हेतोर्वाक्यपदार्थत्वे काव्यलिंगं निगद्यते इति लक्षणान्वितः काव्यलिंगालंकारोऽपि नितरां शोभनरीत्या प्रयुक्तो दृश्यते।

त्रुट्यन्ति सर्वसन्देहास्त्रुटन्ति ग्रन्थयो हृदि।
तुटति ब्रह्मविज्ञानाद्यस्य संसारबन्धनम्[२४]।।

अत्र त्रुट धातो शोभनः प्रयोगो दृश्यते। ब्रह्मज्ञानरूपो हेतुः पदार्थरूपः संसारबन्धनखण्डने वर्ण्यते इति काव्यलिंगालंकारोऽपि।

यो मार्गयति सन्मार्गमपवर्गं च मार्गति।
सांसारिकं तडित्तुल्यं सुखं मृगयते न तु[२५]।।

अत्र तडित्तुल्यमिति विशेषणं साभिप्रायम्, सुखस्य क्षणभंगुरत्वप्रदर्शनत्वात्। अत्र साभिप्राये विशेषणे परिकरालंकारो भवति। इह मृगधातो प्रयोगः शोभनतया कृतः। इत्थं कविरहस्ये विशिष्टाः क्रियाप्रयोगाः सन्ति, येषामनुशीलनेन छात्राणामध्यापकानां च क्रियापदप्रयोगपाटवं जायते।[२६]

## संदर्भ ग्रंथ सूची


१. महाभाष्यम्- १.१.५६
२. अष्टाध्यायी- १.१.५६
३. महाभाष्यम्-१.३.५६
४. महाभाष्यम्-१.३.२५
५. अष्टाध्यायी- ५.१.१२७
६. अष्टाध्यायी- २.१.१०
७. शृङ्गारप्रकाशः, द्वितीयप्रकाशः
८. शृङ्गारप्रकाशे उद्धृतम्
९. अष्टाध्यायी- २.२.२७
१०. अष्टाध्यायी- ३.१.१०
११. अष्टाध्यायी- ३.१.११
१२. शृङ्गारप्रकाशः, पृ०- २६८
१३. सुवृत्ततिलकस्य तृतीयविन्यासारम्भे
१४. कविरहस्यम्- ६
१५. कविरहस्यम्- ४-५

१६. कविरहस्यम्- २३
१७. कविरहस्यम्- ४२
१८. कविरहस्यम्- ३५
१९. कविरहस्यम्- ३७
२०. कविरहस्यम्- ५०
२१. कविरहस्यम्- ४३
२२. कविरहस्यम्- ७
२३. कविरहस्यम्- १२
२४. कविरहस्यम्- ७९
२५. कविरहस्यम्- १०८
२६. कविरहस्यम्- ८९